श्री सोमसुंदराष्टकं

श्री सोमसुंदराष्टकं

इंद्र उवाच |
एकं ब्रह्माद्वितीयं च परिपूर्णं परापरं |
इति यो गीयते वेदैस्तं वंदे सोमसुंदरं || 1 ||

ज्ञातृज्ञानज्ञेयरूपं विश्वव्याप्यं व्यवस्थितं |
यं सर्वैरप्यदृश्योयस्तं वंदे सोमसुंदरं || 2 ||

अश्वमेधादियज्ञैश्च यः समाराध्यते द्विजैः |
ददाति च फलं तेषां तं वंदे सोमसुंदरं || 3 ||

यं विदित्वा बुधाः सर्वे कर्मबंधविवर्जिताः |
लभंते परमां मुक्तिं तं वंदे सोमसुंदरं || 4 ||

देवदेवं यमाराध्य मृकंडुतनयो मुनिः |
नित्यत्वमगमत्सद्यस्तं वंदे सोमसुंदरं || 5 ||

निजनेत्रांबुजकृतं पूजया परितोष्ययं |
श्रीपतिर्लभते चक्रं तं वंदे सोमसुंदरं || 6 ||

येन सर्वं जगत्सृष्टं रक्षितं संहृतं क्रमात् |
नत्वं विज्ञानमानंदं तं वंदे सोमसुंदरं || 7 ||

यस्मात्परं चापरं च किंचिद्वस्तु न विद्यते |
ईश्वरं सर्वभूतानां तं वंदे सोमसुंदरं || 8 ||

यस्मै वेदाश्च चत्वारो नमस्यंत वपुर्धराः |
ईशानं सर्वविद्यानां तं वंदे सोमसुंदरं || 9 ||

यस्य प्रणाममात्रेण संति सर्वाश्च संपदः |
सर्वसिद्धिप्रदं शंभुं तं वंदे सोमसुंदरं || 10 ||

यस्य दर्शनमात्रेण ब्रह्महत्यादि पातकं |
अवश्यं नश्यति क्षिप्रं तं वंदे सोमसुंदरं || 11 ||

उत्तमांगं च चरणं ब्रह्मणा विष्णुनापि च |
न दृश्यते यस्य यत्नस्तं वंदे सोमसुंदरं || 12 ||

इति श्रीहालास्यमाहात्म्ये इंद्रकृतं श्रीसोमसुंदराष्टकं |